National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025( 1(60): 94-95
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Sajna S**
Associate Professor,
Department of Sanskrit,
University College,
Thiruvananthapuram

**Correspondence:**
**Dr. Sajna S**
Associate Professor,
Department of Sanskrit,
University College,
Thiruvananthapuram

# नाट्यवेदस्य प्रासङ्गिकता

**Dr. Sajna S**

**सारांशः**

नाट्यशास्त्रे सर्वाणि शास्त्राणि कलः विविधानि कर्माणि च सम्मिलितानि भवन्ति। रसाः भावाः, अभिनयाः, धर्मो, वृत्तयः, प्रवृत्तयः सिद्धिः, स्वरा, आतोद्यम् गानम्, प्रकृति, उपचारः, मण्डपः इति एषः त्रयोदशप्रकारः नाट्यसंक्षेपरूपः नाट्यशास्त्रस्य सङ्ग्रहः भवति।

**कुंजीशब्दः**

नाट्यम्, वेदं, ब्रह्मदेवः अभिनयः

### आमुखम्

भरतमुनिना विरचितं नाट्यशास्त्रं केवल कलायाः एव न अपि तु काव्यं, संङ्गीतं, नृत्यं नाटकं च इत्यादिभिः कलायाः अनेकैः आनुषङ्गिकैः विषयैः अपि अलङ्कृतम् अस्ति। नाट्यशास्त्रे सामान्यातया 36 अध्यायाः सन्ति। षङ्त्रिंशत् अध्यायेषु षट्सहस्रं ष्लोकाः सन्ति।

अस्मिन् ग्रन्थे प्रथमे अध्याये नाट्योत्पत्तिः, द्वितीये मण्डपविधानम्, अग्रे अध्याये नाट्यारभ्यस्य पूर्वप्रक्रियायाः वर्णनम् रसानां भावनानां च व्याख्यानं वर्तते। वस्तुतः एते रसाः भावाः चैव भारतीयकाव्यशास्त्रस्य आधारः इति मन्यन्ते।

### नाट्यवेदस्य ग्रहत्वं

नाट्यवेदः पञ्चमवेदरूपेण ब्रह्मणा सृष्टः। अस्य उद्देशः लोकार्थं मनोरञ्जनद्वारा धर्मोपदेशस्य प्रचारमेव। नाट्यवेदः त्रिषु लोकेषु विद्यमानानां सर्वकार्याणाम् कथनपूर्वकम् भवति। अस्मिन् नाट्ये क्वचित् धर्मः क्रीटा, अर्थः, शमः, हास्यं, युद्धं, कामं वधः च वर्णितः भवति। नाट्यवेदः धर्मेच्छुकानाम् कृते धर्मं, कामेच्छुकानां कृते कामं, दुष्टजनानाम् कृते मरणं, सज्जनेभ्यः शान्तिपूर्णजीवनं च प्रदर्शयति। नाट्यवेदः निश्चयात्मकबुद्धिरहितानाम् कृते स्थैर्यं, शूरमानिभ्यः उत्साहम्, अज्ञानिभ्यः ज्ञानं पण्टितेभ्य वैदुष्यं च प्रददाति। नाट्यवेदः स्वामिनाम् कृते लीलाम्, दुखितेभ्यः स्थिरताम्, अर्थार्थिभ्यः अर्थम्, व्याकुलचेतसाम् कृते धृतिं च प्रददाति। ब्रह्मदेवेन निर्मितम् एतत् नाट्यशास्त्रम् सर्वप्रकाराणाम् जनानाम् प्रवृत्तिम् आश्रित्य सर्वेषां कृते हितकार्याणाम् उपदेशकम् च भविष्यति। एतद् नाट्यम् दुःखितानाम् श्रमपीडितानां शोकग्रस्तानाम् तापसानाम् च कृते विश्रन्तिदायकम् भविष्यति। एतत् नाट्यम् धर्मप्रदः कीर्तिदायकः आयुषः बुद्धेः च वर्धकः जनानाम् कृते उपदेशदायकः च भविष्यति।

अस्मिन् नाट्ये सर्वविधं ज्ञानं कलाः, विद्याः नृत्तगीतवाद्यादीनि ध्यानादीनि साधनानि विविधानि कर्माणि च उक्तानि सन्ति। अस्मिन् नाट्यवेदे तादृशं किमपि कर्मं नास्ति यत् न स्यात्। अत्र सर्वाणि शास्त्राणि कलाः विविधानि कर्माणि च सम्मिलितानि भवन्ति। विश्वे जीवानाम् सुखदुःखमिश्रिताः भावाः भवन्ति। तेषां भावानाम् आङ्गिकैः वाचिकैः आहार्यैः सात्विकैः

अभिनयैः प्रकटनमेव एव नाट्यम् इति कथ्यते। वेदाः स्मृतिग्रन्थाः धर्मशास्त्राणि च ज्ञानस्य केन्द्राणि भवन्ति। एतेषु यद् उक्तं यद् अनुक्तं च तत्सर्वं स्वीकृत्य मनोरञ्जकरूपेण तेषां प्रदर्शनम् अस्मिन् नाट्यशास्त्रे अस्ति।

नाट्यशास्त्रे देवानाम् असुराणाम् भूपालानाम् मुनिजनानां सर्वेषां च वृत्तान्तप्रदर्शकम् भवति।

भरतमुनिः प्रथमोध्याये नाट्यवेदस्य उत्पत्तिं विवृणोति। पुरा सत्ययुगे स्वायम्भुवन्मन्वन्तरस्य समाप्तेः अनन्तरं त्रेतायुगे वैवस्वतमन्वन्तरस्य आरम्भे देवाः असुराः गन्धर्वाः यक्षाः राक्षसाः महानागाः च इति एते सर्वे ब्रह्मदेवेन निर्मिते जम्बुद्वीपे अधिकारं कृतवन्तः। तत्पश्चात् ते ब्रह्मदेवस्य समीपम् गत्वा एवम् उक्तवन्तः मनोरञ्जनार्थं तादृशं क्रीडनीयम् आवश्यकमेव, यत् दृश्यात्मकं श्रव्यात्मकं च भवेत् इति। तदा तान् देवान् उद्दिश्य ब्रह्मदेवः मनोविनोदयुक्तं, भविष्यतः कालस्य च सर्वकर्मसु मार्गदर्शकं सर्वशास्त्रर्थैः परिपूर्णं सर्वशिल्पप्रवर्तकम् इतिहाससहितं च नाट्यनामकम् पञ्चमम् वेदं विरचितम् इति। सः नाट्यं पाठ्यवस्तूनि ऋग्वेदात्, सङ्गीतं सामवेदात् अभिनयान् यदुर्वेदः शृङ्गारादिकान् रसान् अथर्ववेदतः च स्वीकृतवान्। एवं प्रकारेण सर्वेभ्यः वेदेभ्यः अंशान् स्वीकृत्य सर्ववेदज्ञः ब्रह्मवेदः नाट्यवेदं निर्मितम्।

नाट्यवेदस्य निर्माणे वेदेभ्यः कानि अङ्गानि स्वीकृतम्। नाट्ये पाठ्यवस्तूनि ऋग्वेदान्, सङ्गीतं कामवेदात्, अभिनयः यजुर्वेदतः शृङ्गारादिकान् रसान् अथर्ववेदतः च स्वीकृतवान्। एवं प्रत्येकस्मात् वेदात् कञ्चन अंशं स्वीकृत्य ब्रह्मदेवः नाट्यं नाम पञ्चमम् वेदं कृतं।

**उपसंहारः**

भरतमुनिः प्रथमोध्याये नाट्यवेदस्य उत्पत्तिं विवृणोति। पुरा सत्ययुगे स्वायम्भुवमन्वन्तरस्य समाप्तेः अनन्तरं त्रेतायुगे वैवस्वतमन्वन्तरस्य आरम्भे देवाः असुराः गन्धर्वाः यक्षाः राक्षसाः महानागाः च इति एते सर्वे ब्रह्मदेवेन निर्मिते जम्बुद्वीपे अधिकारे कृतवन्तः। तत्पश्चात् ते ब्रह्मदेवस्य समीपम् गत्वा एवम् फक्तवन्तः मनोरञ्जनार्थं तादृशं क्रीडनीयम् आवश्यकम् यत् दृश्यात्मकं श्रव्यात्मकं च भवेत् इति। तदा तान् देवान् उद्दिश्य ब्रह्मदेवः मनोविनोदयुक्तं, भविष्यतः कालस्य च सर्वकर्मसु मार्गदर्शकं सर्वशास्त्रर्थैः परिपूर्णं सर्वशिल्पप्रवर्तकम् इतिहास-सहितं च।

**Bibliography**

1.Bharata, The Nāṭyaśāstra, M. Ghosh, Trn, Chowkamba Sanskrit Series Office, 2000.

2.Bharata, The Nāṭyaśāstra, Adya Rangacarya, Munshiram Manoharlal Publishers, 1996.

3.Bharata, The Nāṭyaśāstram, Pandit Madhusūdana Sāstri, Chowkamba Sanskrit Series Office,1967.

4.Bharata, The Nāṭyaśāstra, Kapila Vatsya Yanam, Nesma Books, 2001.

5.Nāṭyaśāstram, Radhavallabha Tripati, Banee Publication, 2023.